# Pañcīkaraṇam

॥ श्रीः ॥

by Śrī Ādi Śaṅkarācārya

including the Pañcīkaraṇavārttikam
by Śrī Sureśvarācārya

ॐPress

॥ वाज्ञज्ञेणकल्पताम् ॥

vājñajñeṇakalpatām

॥ ॐ श्री गुरुभ्यो नमः हरिः ॐ ॥

Oṁ śrī gurubhyo namaḥ hariḥ Oṁ

# श्री शङ्करभगवत्पादैः विरचितं पञ्चीकरणम् ॥

# śrī śaṅkarabhagavatpādaiḥ viracitaṁ pañcīkaraṇam*

अथातः परमहंसानां समादिविधिं व्याख्यास्यामः ।

athātaḥ paramahaṁsānāṁ samādividhiṁ vyākhyāsyāmaḥ

सत् शब्दवाच्यमविद्या शबलं ब्रह्म ।

sat śabdavācyamavidyā śabalaṁ brahmā

ब्रह्मणोव्यक्तम् ।

brahmaṇovyaktam

अव्यक्तान्महत् ।

avyaktānmahat

महतोहङ्कारः ।

mahatohaṅkāraḥ

अहङ्कारात्पञ्चतन्मात्राणि ।

ahaṅkārātpañcatanmātrāṇi

पञ्चतन्मात्रेभ्यः पञ्चमहाभूताणि ।

pañcatanmātrebhyaḥ pañcamahābhūtāṇi

पञ्चमहाभूतेभ्योखिलंजगत् ।

pañcamahābhūtebhyokhilaṁjagat

पञ्चानां भूतानाम् ।

pañcānāṁ bhūtānām

*This line is spoken. N.B.: As chanted by Svāmī Oṁkārānanda Sarasvatī.

| | |
|---|---|
| एकैकंविधावि भज्य । | ekaikaṁvidhāvi bhajya |
| स्वार्ध्यभाꣳविहाय । | svārdhabhāgm̐vihāya |
| अर्धभाꣳचतुर्धाविभज्य । | ardhabhāgm̐caturdhāvibhajya |
| इतरेशुयोजिते । | itareśuyojite |
| पञ्चीकरणं । | pañcīkaraṇaṁ |
| मायारूपदर्शनं भवति । | māyārūpadarśanaṁ bhavati |
| अध्यारोपा पवादाभ्यां निष्प्रपञ्चं प्रपञ्चयते । | adhyāropā pavādābhyāṁ niṣprapañcaṁ prapañcyate |
| पञ्चीकृतपञ्चमहाभूतानि | pañcīkṛtapañcamahābhūtāni |
| तत्कार्यं च सर्वं | tatkāryaṁ ca sarvaṁ |
| विराडित्युच्यते । | virāḍityucyate |
| एतत्स्थूलशरीरमात्मनः । | etatatsthūlaśarīramātmanaḥ |
| ईन्द्रियैरर्थोपलब्धिः जागरितम् । | īndriyairarthopalabdhiḥ jāgaritam |

| | |
|---|---|
| तदुभयाभिमानि आत्मा विश्वः । | tadubhayābhimāni ātmā viśvaḥ |
| एतत् त्रयम् अकारः ॥ १ ॥ | etat traym akāraḥ (1) |
| अपञ्चीकृतपञ्चमहाभूताणि | apañcīkṛtapañcamahābhūtāṇi |
| पञ्चतन्मात्राणि | pañcatanmātrāṇi |
| तत्कार्यँ च पञ्च प्राणाः | tatkāryaṁ ca pañca prāṇāḥ |
| दशेन्द्रियाणि | daśendriyāṇi |
| मनोबुद्धिश्चेति | manobuddhiśceti |
| सप्तदशकं लिङ्गम् | saptadaśkaṁ liṅgam |
| भौतिकं | bhautikaṁ |
| हिरण्यगर्भ इत्युच्यते । | hiraṇyagarbha ityucyate |
| एतत्सूक्ष्मशरीरमात्मनः ॥ २ ॥ | etatsūkṣmaśarīramātmanaḥ (2) |
| करणेषूपसंहृतेषु | karaṇeṣūpasaṁhṛteṣu |

| | |
|---|---|
| जागरितसंस्कारजः प्रत्ययः | jāgaritasaṁskārajaḥ pratyayaḥ |
| सविषयः | saviṣayaḥ |
| स्वप्न इत्युच्यते । | svapna ityucyate |
| तदुभयाभिमानि आत्मा | tadubhayābhimāni ātmā |
| तैजसः । | taijasaḥ |
| एतत् त्रयम् उकारः ॥ ३ ॥ | etat trayam ukāraḥ (3) |
| शरीरद्वयकारणम् | śarīradvayakāraṇam |
| आत्म अज्ञानं | ātma ajñānaṁ |
| साभासम् | sābhāsam |
| अव्याकृतम् इत्युच्यते । | avyākṛtam ityucyate |
| एतत् कारणशरीरम् आत्मनः । | etat kāraṇaśarīram ātmanaḥ |
| तच्च न सत् | tacca na sat |

| | |
|---|---|
| न असत् | na asat |
| नापि सदसत् | nāpi sadasat |
| नभिन्नम् | nabhinnam |
| न अभिन्नम् | na abhinnam |
| नापि भिन्नाभिन्नम् | nāpi bhinnābhinnam |
| कुतश्चित् | kutaścit |
| न निरवयवम् | na niravayavam |
| न सावयवम् | na sāvayavam |
| नोभयम् | nobhayam |
| किंतु | kiṁtu |
| केवलब्रह्म आत्म एकत्वज्ञान अपनोद्यम् ॥ ४ ॥ | kevalabrahma ātma ekatvajñāna apanodyam (4) |
| सर्वप्रकारज्ञानोपसंहारे | sarvaprakārajñānopasaṁhāre |

| | |
|---|---|
| बुद्धेः | buddheḥ |
| कारणात्मनाऽवस्थानं सुषुप्तिः । | kāraṇātmanā’vasthānaṁ suṣuptiḥ |
| तदुभयाभिमानि आत्मा | tadubhayābhimāni ātmā |
| प्राज्ञः । | prājñaḥ |
| एतत् त्रयम् मकारः ॥ ५ ॥ | etat trayam makāraḥ (5) |
| अकार उकारे | akāra ukāre |
| उकारो मकारे | ukāro makāre |
| मकार ओंकारे | makāra oṁkāre |
| ओंकारः अहमि एव । | oṁkāraḥ ahami eva |
| अहमात्मा | ahamātmā |
| साक्षी | sākṣī |
| केवलः | kevalaḥ |

| | |
|---|---|
| चिन्मात्रस्वरूपः | cinmātrasvarūpaḥ |
| न अज्ञानम् | na ajñānam |
| नापि तत्कार्यम् | nāpi tatkāryam |
| किंतु | kiṁtu |
| नित्यशुद्धबुद्धमुक्तसत्यस्वभावम् | nityaśuddhabuddhamuktasatyasvabhāvam |
| परमानन्द अद्वयम् | paramānanda advayam |
| प्रत्यग्भूतचैतन्यम् | pratyagbhūtacaitanyam |
| ब्रह्मैव अहमस्मीति | brahmaiva ahmasmīti |
| अभेदेन अवस्थानं समाधिः ॥ ६ ॥ | abhedena avasthānaṁ samādhiḥ (6) |
| तत्त्वमसि | tattvamasi |
| ब्रह्माहमस्मि | brahmāhamasmi |
| प्रज्ञानमानन्दं ब्रह्म | prajñānamānandaṁ brahma |

अयमात्मा ब्रह्म | ayamātmā brahma

इत्यादिश्रुतिभ्यः ॥ ७ ॥ | ityādiśrutibhyaḥ (7)

इति पञ्चीकरणं भवति ॥

iti pañcīkaraṇaṁ bhavati

इति श्रीशङ्कराचार्यविरचितं पञ्चीकरणम् समाप्तम् ॥

iti śrīśaṅkarācāryaviracitaṁ pañcīkaraṇam samāptam

ॐ तत् सत् ॥

Oṁ tat sat

ब्रह्मार्पणं अस्तु ॥

brahmārpaṇaṁ astu





॥ ॐ श्री गुरुभ्यो नमः ॥

# श्री सुरेश्वराचार्यकृतं पञ्चीकरणवार्त्तिकम्

ओंकारः सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥ १ ॥

आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशात् बीजमव्याकृतात्मकम् ॥ २ ॥

तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुः तेजोरूपात्मकं ततः ॥ ३ ॥

आपो रसात्मिकास्तस्मात् ताभ्यो गन्धात्मिका महि ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥ ४ ॥

शब्दस्पर्शरूपगुणैः त्रिगुणं तेज उच्यते ।
शब्दस्पर्शरूपरसैः गुणैरापश्चतुर्गुणाः ॥ ५ ॥

Oṁ śrī gurubhyo namaḥ

# śrī sureśvarācāryakṛtaṁ pañcīkaraṇavārttikam*

oṁkāraḥ sarvavedānāṁ sārastattvaprakāśakaḥ
tena cittasamādhānaṁ mumukṣūṇāṁ prakāśyate (1)

āsīdekaṁ paraṁ brahma nityamuktamavikriyam
tatsvamāyāsamāveśāt bījamavyākṛtātmakam (2)

tasmādākāśamutpannaṁ śabdatanmātrarūpakam
sparśātmakastato vāyuḥ tejorūpātmakaṁ tataḥ (3)

āpo rasātmikāstasmāt tābhyo gandhātmikā mahi
śabdaikaguṇamākāśaṁ śabdasparśaguṇo marut (4)

śabdasparśarūpaguṇaiḥ triguṇaṁ teja ucyate
śabdasparśarūparasaiḥ guṇairāpaścaturguṇāḥ (5)

*This line is spoken.

| | |
|---|---|
| शब्दस्पर्शरूपरस गन्धैः पञ्चगुणा मही । | śabdasparśarūparasa gandhaiḥ pañcaguṇā mahī |
| तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महत् ॥ ६ ॥ | tebhyaḥ samabhavatsūtraṁ liṅgaṁ sarvātmakaṁ mahat (6) |
| ततः स्थूलानि भूतानि पञ्च तेभ्यो विराडभूत् । | tataḥ sthūlāni bhūtāni pañca tebhyo virāḍabhūt |
| पञ्चीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः ॥ ७ ॥ | pañcīkṛtāni bhūtāni sthūlānītyucyate budhaiḥ (7) |
| पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा । | pṛthivyādīni bhūtāni pratyekaṁ vibhajeddvidhā |
| एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥ ८ ॥ | ekaikaṁ bhāgamādāya caturdhā vibhajetpunaḥ (8) |
| एकैकं भागमेकस्मिन् भूते संवेशयेत्क्रमात् । | ekaikaṁ bhāgamekasmin bhūte saṁveśayetkramāt |
| ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥ ८ ॥ | tataścakāśabhūtasaya bhāgāḥ pañca bhavanti hi (9) |
| वाय्वादिभागाश्चत्वारः वाय्वादिष्वेवमादिशेत् । | vāyvādibhāgāścatvāraḥ vāyvādiṣvevamādiśet |
| पञ्चीकरणमेतत्स्यात् इत्याहुस्तत्त्ववेदिनः ॥ १० ॥ | pañcīkaraṇametatsyāt ityāhustattvavedinaḥ (10) |
| पञ्चीकृतानि भूतानि तत्कार्यं च विराडभूत् । | pañcīkṛtāni bhūtāni tatkārayaṁ ca virāḍabhūt |
| स्थूलं शरीरमेतत्स्यात् अशरीरस्य चात्मनः ॥ ११ ॥ | sthūlaṁ śarīrametatsyāt aśarīrasya cātmanaḥ (11) |

| | |
|---|---|
| अधिदैवतमध्यात्वम् अधिभूतमिति त्रिधा । | adhidaivatamadhyātvam adhibhūtamiti tridhā |
| एकं ब्रह्म विभागेन भ्रमाद्भाति न तत्त्वत्तः ॥ १२ ॥ | ekaṁ brahma vibhāgena bhramādbhāti na tattvattaḥ **(12)** |
| इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः । | indriyairarthavijñānaṁ devatānugrahānvitaiḥ |
| शब्दादिविषयं ज्ञानं तज्जागरितमुच्यते ॥ १३ ॥ | śabdādiviṣayaṁ jñānaṁ tajjāgaritamucyate **(13)** |
| श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यं शब्दलक्षणम् । | śrotramadhyātmamityuktaṁ śrotavyaṁ śabdalakṣaṇam |
| अधिभूतं तदित्युक्तं विशस्तत्राधिदैवतम् ॥ १४ ॥ | adhibhūtaṁ tadityuktaṁ viśastatrādhidaivatam **(14)** |
| त्वगध्यात्ममिति प्रोक्तं स्प्रष्टव्यं स्पर्शलक्षणम् । | tvagadhyātmamiti proktaṁ spraṣṭavyaṁ sparṣlakṣaṇam |
| अधिभूतं तदित्युक्तं वायुस्तत्राधिदैवतम् ॥ १५ ॥ | adhibhūtaṁ tadityuktaṁ vāyustatrādhidaivatam **(15)** |
| चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणम् । | cakṣuradhyātmamityuktaṁ draṣṭavyaṁ rūpalakṣaṇam |
| अधिभूतं तदित्युक्तं आदित्योऽत्राधिदैवतम् ॥ १६ ॥ | adhibhūtaṁ tadityuktaṁ ādityo'trādhidaivatam **(16)** |
| जिह्वाऽध्यात्मं तयाऽस्वाद्यं आधिभूतं रसात्मकम् । | jihvā'dhyātmaṁ tayā'svādyaṁ ādhibhūtaṁ rasātmakam |
| वरुणो देवता तत्र जिह्वायामधिदैवतम् ॥ १७ ॥ | varuṇo devatā tatra jihvāyāmadhidaivatam **(17)** |

घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गन्धलक्षणम् ।
अधिभूतं तदित्युक्तं अश्विनावधिदैवतम् ॥ १८ ॥

ghrāṇamadhyātmamityuktaṁ ghrātavyaṁ gandhalakṣaṇam
adhibhūtaṁ tadityuktaṁ aśvināvadhidaivatam (18)

वागध्यात्ममिति प्रोक्तं वक्त्वयं शब्दलक्षणम् ।
अधिभूतं तदित्युक्तं अग्निस्तत्राधिदैवतम् ॥ १९ ॥

vāgadhyātmamiti proktaṁ vaktvayaṁ śabdalakṣaṇam
adhibhūtaṁ tadityuktaṁ agnistatrādhidaivatam (19)

हस्तावध्यात्ममित्युक्तं आदातव्यं च यद्भवेत् ।
अधिभूतं तदित्युक्तं इन्द्रस्तत्राधिदैवतम् ॥ २० ॥

hastāvadhyātmamityuktaṁ ādātavyaṁ ca yadbhavet
adhibhūtaṁ tadityuktaṁ indrastatrādhidaivatam (20)

पादावध्यात्ममित्युक्तं गन्तव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं विष्णुस्तत्राधिदैवतम् ॥ २१ ॥

pādāvadhyātamamityuktaṁ gantavyaṁ tatra yadbhavet
adhibhūtaṁ tadityuktaṁ viṣṇustatrādhidaivatam (21)

वायुरिन्द्रियमध्यात्मं विसर्गस्तत्र यो भवेत् ।
अधिभूतं तदित्युक्तं मृत्युस्तत्राधिदैवतम् ॥ २२ ॥

vāyurindriyamadhyātamaṁ visargastatra yo bhavet
adhibhūtaṁ tadityuktaṁ mṛtyustatrādhidaivatam (22)

उपस्थेन्द्रियमध्यात्मं स्त्रियाद्यानन्द कारणम् ।
अदिभूतं तदित्युक्तं अधिदैवं प्रजापतिः ॥ २३ ॥

upasthendriyamadhyātmaṁ striyādyānanda kāraṇam
adhibhūtaṁ tadityuktaṁ adhidaivaṁ prajāpatiḥ (23)

मनोऽध्यात्ममिति प्रोक्तं मन्तव्यं तत्र यद्भवेत्। mano'dhyātmamiti proktaṁ mantavyaṁ tatra yadbhavet

अधिभूतं तदित्युक्तं चन्द्रस्तत्राधिदैवतम्॥ २४॥ adhibhūtaṁ tadityuktaṁ candrastatrādhidaivatam **(24)**

बुद्धिरध्यात्ममित्युक्तं बोद्धव्यं तत्र यद्भवेत्। buddhiradhyātamamityuktaṁ boddhavyaṁ tatra yadbhavet

अधिभूतं तदित्युक्तं अधिदैवं बृहस्पतिः॥ २५॥ adhibhūtaṁ tadityuktaṁ adhidaivaṁ bṛhaspatiḥ **(25)**

अहंकारस्तथाऽध्यात्मं अहंकर्तव्यमेव यत्। ahaṁkārastathā’dhyātmaṁ ahaṁkartavyameva yat

अधिभूतं तदित्यक्तिं रुद्रस्तत्राधिदैवतम्॥ २६॥ adhibhūtaṁ tadityaktaṁ rudrastatrādhidaivatam **(26)**

चित्तमध्यात्ममित्युक्तं चेतव्यं तत्र यद्भवेत्। cittamadhyātmamityuktaṁ cetavyaṁ tatra yadbhavet

अधिभूतं तदित्युक्तिं क्षेत्रज्ञोऽत्राधिदैवतम्॥ २७॥ adhibhūtaṁ dadityuktaṁ kṣetrajño’trādhidaivatam **(27)**

तमोऽध्यात्ममत्मिति प्रोक्तं विकारस्तत्र यो भवेत्। tamo’dhyātmamatmiti proktaṁ vikārastatra yobhavet

अधिभूतं तदित्युक्तं ईश्वरोऽत्राधिदैवतम्॥ २८॥ adhibhūtaṁ tadityuktaṁ īśvaro’trādhidaivatam **(28)**

बाह्यान्तःकरणैरेवं देवतानुग्रहान्वितैः। bāhyāntaḥkaraṇairevaṁ devatānugrahānvitaiḥ

स्वं स्वं च विष्यज्ञानं तज्जागरितमुच्यते॥ २९॥ svaṁ svaṁ ca viṣyajñānaṁ tajjāgaritamucyate **(29)**

येयं जागरितावस्था शरीरं करणाश्रयम् । yeyaṁ jāgaritāvasthā śarīraṁ karaṇāśrayam

यस्तयोरभिमानीस्यात् विश्व इत्यभिधीयते ॥ ३० ॥ yastayorabhimānīsyāt viśva ityabhidhīyate (30)

विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये । viśvaṁ vairājarūpeṇa paśyedbhedanivṛttaye

ज्ञानेन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियान्यपि ॥ ३१ ॥ jñānendriyāṇi pañcaiva pañcakarmendriyānyapi (31)

श्रोत्रंत्वङ्नयनंजिह्वा घ्राणम्धीन्द्रियपञ्चकम् । śrotraṁtvaṅnayanaṁjihvā ghrāṇamdhīndriyapañcakam

वाक्पाणिपादपायुपस्थाःकर्मेन्द्रियपञ्चकम् ॥ ३२ ॥ vākpāṇipādapāyupasthāḥkarmendriyapañcakam (32)

मनोबुद्धिरहंकारः चित्तंचेतश्चतुष्टयम् । manobuddhirahaṁkāraḥ cittaṁcetaścatuṣṭayam

संकल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी ॥ ३३ ॥ saṁkalpākhyaṁ manorūpaṁ buddhirniścayarūpiṇī (33)

अभिमानात्मकस्तद्वत् अहंकरः प्रकीर्तितः । abhimānātmakstadvat ahaṁkaraḥ prakīrtitaḥ

अनुसंधानरूपं च चित्तमित्यभिधीयते ॥ ३४ ॥ anusaṁdhānarūpaṁ ca cittamityabhidhīyate (34)

प्राणोऽपानस्तथा व्यानः उदानाख्यस्तथैव च । prāṇo’pānastathā vyānaḥ udānākhyastathaiva ca

समानश्चेति पञ्चैताः कीर्तिताः प्रणवृत्तयः ॥ ३५ ॥ samānaśceti pañcaitāḥ kīrtitāḥ praṇavṛttayaḥ (35)

| | |
|---|---|
| खंवाव्यज्ञंबुक्षितयः भूतसूक्ष्माणि पञ्च च । | khaṁvāvyajñaṁbukṣitayaḥ bhūtasūkṣmāṇi pañca ca |
| अविद्याकामकर्माणि लिङ्गं पुयेष्टकं विदुः ॥ ३६ ॥ | avidyākāmakarmāṇi liṅgaṁ puyeṣṭakaṁ viduḥ **(36)** |
| एतत्सूक्ष्मशरीरंस्यात् मायिकं प्रत्यगात्मनः । | etatsūkṣmaśarīraṁsyāt māyikaṁ pratyagātmanaḥ |
| करणोपरमे जाग्रत् संस्कारोत्थ प्रबोधवत् ॥ ३७ ॥ | karaṇoparame jāgrat saṁskārottha prabodhavat **(37)** |
| ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते । | grāhyagrāhakarūpeṇa sphuraṇaṁ svapna ucyate |
| अभिमानी तयोर्यस्तु तैजसः परिकीर्तितः ॥ ३८ ॥ | abhimānī tayoryastu taijasaḥ parikīrtitaḥ **(38)** |
| हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः । | hiraṇyagarbharūpeṇa taijasaṁ cintayedbudhaḥ |
| चैतन्याभासखचितं शरीरद्वयकारणम् ॥ ३९ ॥ | caitanyābhāsakhacitaṁ śarīradvayakāraṇam **(39)** |
| आत्माज्ञानं तदव्यक्तं अव्याकृतमितीर्यते । | ātmājñānaṁ tadavyaktaṁ avyākṛtamitīryate |
| न सन्नासन्न सदसत् भिन्नाभिन्नं न चात्मनः ॥ ४० ॥ | na sannāsanna sadasat bhinnābhinnaṁ na cātmanaḥ **(40)** |
| न सभाꣳ न निर्भाꣳ न चाप्युभयरूपकम् । | na sabhāgm̐ na nirbhāgm̐ na cāpyubhayarūpakam |
| ब्रह्मात्मैकत्वविज्ञान हेयं मिथ्यात्वकारणात् ॥ ४१ ॥ | brahmātmaikatvavijñāna heyaṁ mithyātvakāraṇāt **(41)** |

ज्ञानानामुपसंहारः बुद्धेः करणतास्थितिः ।
वटबीजे वटस्तेव सुषुप्तिरभिधीयते ॥ ४२ ॥
अभिमानी तयोर्यस्तु प्राज्ञ इत्यभिधीयते ।
जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् ॥ ४३ ॥
विश्वतैजससौषुपत विराड्सुत्राक्षरात्मभिः ।
विभिन्नमिव सन्मोहात् एकं सत्त्वं चिदात्मकम् ॥ ४४ ॥
विश्वादिकंत्रयं यस्मात् वैराजादित्रयात्मकम् ।
एकत्वेनैव संपश्येत् अन्याभावप्रसिद्धये ॥ ४५ ॥
ओंकारमात्रमखिलं विश्वप्राज्ञादिलक्षणम् ।
वाच्यवाचलताभेदत् भेदेनानुपलब्धितः ॥ ४६ ॥
अकारमात्रं विश्वः स्यात् उकारस्तैजसः स्मृतः ।
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु ॥ ४७ ॥

jñānānāmupasaṁhāraḥ buddheḥ karaṇatāsthitiḥ
vaṭabīje vaṭasteva suṣuptirabhidhīyate **(42)**
abhimānī tayoryastu prājña ityabhidhīyate
jagatkāraṇarūpeṇa prājñātmānaṁ vicintayet **(43)**
viśvataijasasauṣupata virāṭsutrākṣarātmabhiḥ
vibhinnamiva sanmohāt ekaṁ sattvaṁ cidātmakam **(44)**
viśvādikaṁtryaṁ yasmāt vairājāditrayātmakam
ekatvenaiva saṁpaśyet anyābhāvaprasiddhaye **(45)**
oṁkāramātramakhilaṁ viśvaprājñādilakṣaṇam
vācyavācakatābhedat bhedenānupalabdhitaḥ **(46)**
akāramātraṁ viśvaḥ syāt ukārastaijsaḥ smṛtaḥ
prājño makāra ityevaṁ paripaśyetkrameṇa tu **(47)**

समाधिकालाप्प्रागेवं विचिन्त्यातिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत् ॥ ४८ ॥
अकारं पुरुषं विश्वं उकारे प्रविलापयेत् ।
उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ॥ ४९ ॥
मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ।
चिदात्माऽहं नित्यशुद्ध बुद्धमुक्तसदद्वयः ॥ ५० ॥
परमानन्दसंदोहः वासुदेवोऽहमोमिति ।
ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत् ॥ ५१ ॥
चिदात्मनि विलीनं चेत् तच्चित्तं नवि चालयेत् ।
पूर्णबोधात्मनाऽसीत पूर्णाचलसमुद्रवत् ॥ ५२ ॥
एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः ।
जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयम् ॥ ५३ ॥

samādhikālāpprāgevaṁ vicintyātiprayatnataḥ
sthūlasūkṣmakramātsarvaṁ cidātmani vilāpayet **(48)**
akāraṁ puruṣaṁ viśvaṁ ukāre pravilāpayet
ukāraṁ taijasaṁ sūkṣmaṁ makāre pravilāpayet **(49)**
makāraṁ kāraṇaṁ prājñaṁ cidātmani vilāpayet
cidātmā'haṁ nityaśuddha buddhamuktasadadvayaḥ **(50)**
paramānandasaṁdohaḥ vāsudevo'hamomiti
jñātvā vivecakaṁ cittaṁ tatsākṣiṇi vilāpayet **(51)**
cidātmani vilīnaṁ cet taccittaṁ navi cālayet
pūrṇabodhātmanā'sīta pūrṇācalasamudravat **(52)**
evaṁ samāhito yogī śraddhābhaktisamanvitaḥ
jitendriyo jitakrodhaḥ paśyedātmānamadvayam **(53)**

आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥ ५४ ॥
यः पश्येत्सर्वगं शान्तम् आनन्दात्मानमद्वयम् ।
न तेन किंचिदाप्तव्यं ज्ञातव्यं वावशिष्यते ॥ ५५ ॥
कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवेत्सदा ।
आत्मन्यारूढभावस्तु जगदेतन्न वीक्षते ॥ ५६ ॥
कदाचिद्व्यवहारेषु द्वैतं यद्यपि पश्यति ।
बोधात्मव्यतिरेकेण न पश्यति चिदन्वयात् ॥ ५७ ॥
किन्तु पश्यति मिथ्यैव दिङ्मोहेन्दोर्विभागवत् ।
प्रतिभासः शरीरस्य तदाऽप्रारब्धसंक्षयात् ॥ ५८ ॥
तस्य तावदेव चिरम् इत्यादि श्रुतिरब्रवीत् ।
प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः ॥ ५९ ॥

ādimadhyāvasāneṣu duḥkhaṁ sarvamidaṁ yataḥ
tasmātsarvaṁ parityajya tattvaniṣṭho bhavetsadā **(54)**
yaḥ paśyetsarvagaṁ śāntam ānandātmānamadvayam
na tena kiṁcidāptavyaṁ jñātavyaṁ vāvaśiṣyate **(55)**
kṛtakṛtyo bhavedvidvān jīvanmukto bhavetsadā
ātmanyārūḍhabhāvastu jagadetanna vīkṣate **(56)**
kadācidavyavahāreṣu dvaitaṁ yadyapi paśyati
bodhātmavyatirekeṇa na paśyati cidanvayāt **(57)**
kintu paśyati mithyaiva diṅmohendovibhāgavat
pratibhāsaḥ śarīrasya tadā'prārabdhasaṁkṣayāt **(58)**
tasya tāvadeva ciram ityādi śrutirabravīt
prārabdhasyānuvṛttistu muktasyābhāsamātrataḥ **(59)**

सर्वदा मुक्त एवस्यत् ज्ञाततत्त्वः पुमानसौ ।

sarvadā mukta evasyat jñātatattvaḥ pumānasau

प्रारब्धभोगशेषस्य संक्षये तदनन्तरम् ॥ ६० ॥

prārabdhabhogaśeṣasya saṁkṣaye tadanantaram (60)

अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।

avidyātimirātītaṁ sarvābhāsavivarjitam

चैतन्यममलं शुद्धं मनोवाचामगोचरम् ॥ ६१ ॥

caitanyamamalaṁ śuddhaṁ manovācāmagocaram (61)

वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ।

vācyavāckanirmuktaṁ heyopādeyavarjitam

प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ॥ ६२ ॥

prajñānaghanamānandaṁ vaiṣṇavaṁ padamaśnute (62)

इदं प्रकरणं यत्नात् ज्ञातव्यं भगवत्तमैः ।

idaṁ prakaraṇaṁ yatnāt jñātavyaṁ bhagavattamaiḥ

अमानित्वादिनियमैः गुरु भक्तिप्रसादतः ॥ ६३ ॥

amānitvādiniyamaiḥ guru bhaktiprasādataḥ (63)

इमां विद्यांप्रयत्नेन योगी संध्यासु सर्वदा ।

imāṁ vidyāṁprayatnena yogī saṁdhyāsu sarvadā

समभ्यसेदिहामुत्र भोगानासक्तधीः सुधीः ॥ ६४ ॥

samabhyasedihāmutra bhogānāsaktadhīḥ sudhīḥ (64)

इति श्रीमत्सुरेश्वराचार्यविरचितं

पञ्चीकरणवार्त्तिकं संपूर्णम् ॥

ॐ तत् सत् ॥

ब्रह्मार्पणं अस्तु ॥



iti śrīmatsureśvarācāravircitaṁ

pañcīkaraṇavārttikaṁ saṁpūrṇam

Oṁ tat sat

brahmārpaṇaṁ astu

